**महाकविना अम्विकादत्तव्यासेन विरचितस्य "शिवराजविजयम्" इति काव्यस्य प्रथमनिश्वासस्य प्रधानविशेषत्वानां वर्णना प्रदीयताम् ?**

**उ.** साहित्यस्य विभिन्नेषु शाखासु उपन्यासः सर्वाधुनिकः, सर्वभ्य जनप्रियः च। आङ्गलभाषायां ड्यानियेलडिफोमहोदयः वङ्गभाषायां च ऋषिवङ्किमचन्द्रचट्टोपाध्यायमहोदयः उपन्यासधारायाः प्रथमः सार्थकः रूपकारः। वङ्गोपन्यासेन अनुप्रेरणालब्धः अम्विकादत्तव्यासः भवति आधुनिकसंस्कृतसाहित्यस्य प्रथमः सार्थकः उपन्यासकारः। 1870 ईशवीयाब्दे महाकविना अम्विकादत्तव्यासेन विरचितः "शिवराजविजयः" इति ऐतिहासिकोपन्यासोऽयं विरामत्रयेण विभक्तः। पुनः विरामत्रयः चतुर्निश्वासेषु विभक्तः। अस्मिन् ग्रन्थे द्वादशनिश्वासाः आसन् । अस्माकं पाठ्यांशे प्रथमनिश्वासोऽयं काल्पनिकः ऐतिहासिककथामिश्रितः च। अस्मिन् यथा विद्यते व्रक्ष्मचारीणां गुरुदेवः, गौरसिंहः, श्यामसिंहः, योगिराजः इत्यादीनि काल्पनिकचरित्राणि तथा दृश्यन्ते शिववीरः शायेस्ताखान्, आफजलखान्, महामदो गजनी, शहावुद्दीनः, अकवरशाहः, औरङ्गजेवः इत्यादीनि चरित्राण्यपि। अतः विभिन्नचरित्राणां घटनायाः संमिश्रनेन च प्रथमनिश्वासोऽयं गभीरभावेन विशेषत्त्वमयः। यथा -

क) प्रातः कालीनं प्रकृतिवर्णना - महाकविव्यासेन प्रातः कालस्य सुमनोहरवर्णनया काव्यमिदं प्रारभ्यते। प्रातःकालीनवर्णनायां तेन देवदिवाकरस्य भगवानसूर्यस्य अशेषगुणसमूहानां गुणकीर्तनं कृतम्। तेनोक्तम् - "अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः। एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचर-चक्रस्य, प्रेयान् पुण्डरीक-पटलस्य, शोक-विमोकः कोकलोकस्य, अवलम्बो रोलम्वकदम्वस्य, सुत्रधार सर्वव्यवहारस्य, इनश्च दिनश्च।"

ख) सन्ध्याकालीनः प्रकृतिवर्णना - कविना सन्ध्याकालस्य अपरूपवर्णना कृता। सन्ध्याकालस्य शान्तपरिवेशः तथा अचलाञ्चलस्य प्रकृतिः आसीत्

शान्ता, स्फुतिदायिका, स्तव्धा, कोलाहलमुखरा च। कविनिक्तम् - "धीर-समीर-स्पर्शेण-मन्द-मन्द-मान्दोल्य-मानासु व्रततिषु, समुदिते यामिनी-कामिनी-चन्दनविन्दौ इव इन्दो, कौमुदी-कपटेन सुधाधारामिव वर्षन्ति गगने, अस्मन्नीतिवार्ता शुश्रूशु इव मौनमाकलयत्सु पतग-कुलेषु, कैरव-विकाश-हर्ष-प्रकाश-मुखरेषु चञ्चरीकेषु।"

ग) गौरसिंहस्य वर्णना - गौरवर्णव्रक्ष्मचारिणः वर्णनायाम् अपि कविः अक्लान्तः। आदौ तस्य कर्मदक्षतावर्णनाप्रसङ्गे कविना उक्तम् - "गुरु-सेवन्-पटु-विप्र-वटुः"। अतः तस्य गौरवर्णव्रक्ष्मचारिणः अपरूपस्य कायसौन्दर्यस्य वर्णनायां कवि अवदत् - "वटुरसौ आकृत्या सुन्दरः, वर्णेन गौरः, जटाभिः व्रक्ष्मचारी वयसा षोडशवर्षदेशीय, कुम्वुकण्ठः आयतललाटः, सुवाहुः विशाल-लोचनश्चासीत्।"

घ) योगिराजस्य वर्णना - योगिराजः इति श्ब्दस्यार्थः- यः चित्तचाञ्चल्यं अवदस्य अलौकिकशक्तिं सञ्चितवान्। एषु योगिषु यः श्रेष्ठः स हि योगिराजः। ईद्दशस्य योगिराजस्य दैहिकसौन्दर्य्यवर्णनाप्रसङ्गे कविनोक्तम् - " सुघटितं शरीरम्, सान्द्रां जटाम्, विशालान्यङ्गानि, अङ्गारप्रतिमे नयने, मधुरां गम्भीरां च वाचं वर्णयन्तश्चकिता इव सञ्जाताः।"

ङ) यवनयुवकस्य वर्णना - यवनयुवकस्य वर्णनायां द्दश्यते - तस्य मस्तकमासीत् नीलवस्त्रेनाच्छादितम्। तस्य वस्त्रमासीत् विचित्रवर्णरञ्जितम्। स असिमेकं नीम्नाभिमुखिं कृत्वा सज्जितवान्। स तस्य केशश्मोश्रूपरि हस्तसञ्चालनस्य छलना यथा कन्यापहरणजनितपापं चित्तिता।

च) तस्मिन् समये समाजस्य वर्णना - "शिवराजविजयम्" इति काव्यस्य प्रथमनिश्वासे त्स्मिन्नेव् समयस्य वास्तवोचितवर्णना द्दश्यते यस्मिन् समये भारतवासिनः अत्याचारेण जर्जरिताः। कविः अवदत् - "सम्प्रति तु म्लेच्छैर्गावो हन्यते, वेदा विदीर्यन्ते, स्मृतयः समृद्यन्ते, मन्दिराणि मन्थरीक्रियते, सत्यः पात्यन्ते, सन्तश्च सन्ताप्यन्ते।"

छ) रसस्न्निवेशः - "शिवराजविजयम्" काव्यस्य प्रथमनिश्वासः शान्तरसेन प्रारभ्यते वीररसेन समाप्यते च। मध्ये दृश्यते करुणरसस्य समावेशः। अस्मिन् निश्वासे देशभक्तिः, आत्मरक्षा, शरणागतप्रियता, कर्तव्यनिष्ठा आत्मगौरवः इत्यादीनां प्राणवन्ता वर्णना दृश्यते।

अस्मिन् निश्वासे उपमा, अनुप्रासः, रूपकः इत्यादीनां अलंकाराणां प्रयोगः दृश्यते। स्वल्पमात्रायां समासः विद्यते। अस्य निश्वासस्य भाषा अत्यन्ता प्रभावमयी, पदविन्यासं च लालित्यपुर्वम्। अधिकांशस्थाने चूर्णकगद्यं व्यवहृतम्। अस्य निश्वासस्य शिल्पसौन्दर्य्यं आकर्षणीयम्। अतः संक्षेपेण कथ्यते शिवराजविजय इति काव्यस्य प्रथमनिश्वासोऽयं भाव-भाषा- शिल्प-वर्णनाशैली इत्यादि अत्युत्तमः वहुसाहित्यिकविशेषत्त्व्यैः परिपूर्णः च ।